## नाव्ययीभावादतोऽम् त्वपञ्चम्याः । (८३/६५७)

पूर्वेण [1]लुक् प्राप्तः प्रतिषिध्यते । अदन्तादव्ययीभावादुत्तरस्य सुपो न लुग् भवति, [2]अमादेशस्तु [3]तस्य सुपो भवत्यपञ्चम्याः । [4]एतस्मिन् प्रतिषिद्धे पञ्चम्याः [5]श्रवणमेव भवति । उपकुम्भं तिष्ठति । उपकुम्भं पश्य । [6]उपमणिकं तिष्ठति । उपमणिकं पश्य । अतः इति [7]किम् ? अधिस्त्रि । [8]अधिकुमारि । अपञ्चम्याः इति किम् ? उपकुम्भादानय ॥

## तृतीयासप्तम्योर्बहुलम् । (८४/६५८)

पूर्वेण नित्यमम्भावे प्राप्ते वचनमि[9]दम् । तृतीयासप्तम्योः[10]विभक्त्योर्बहुलम्[11]अम्भावो भवति [12]अव्ययीभावे । उपकुम्भेन कृतम्, उपकुम्भं कृतम् । उपकुम्भे निधेहि, उपकुम्भं निधेहि ।

[१७७] सप्तम्या [13]ऋद्धिनदीसमाससङ्ख्यावयवेभ्यो नित्यमिति वक्तव्यम् । (म.भा. १.४९९)

[14]सुमद्रम् [15]सुमगधम् । [16]उन्मत्तगङ्गम् । [17]लोहितगङ्गम् । [18]एकविंशतिभारद्वाजम् (म.भा. १.४९९) । [19]बहुलवचनात् सिद्धम् ॥

## लुटः प्रथमस्य डारौरसः (८५/२१८८)

लुडादेशस्य प्रथमपुरुषस्य परस्मैपदस्यात्मनेपदस्य च [20]यथाक्रमम् डा रौ रस् इत्येते आदेशा भवन्ति । कर्ता, कर्तारौ, कर्तारः । [21]आत्मनेपदस्य — अध्येता, अध्येतारौ, अध्येतारः । [22]प्रथमस्य इति किम् ? [23]श्वः कर्तासि । श्वोऽध्येतासे ॥

इति [24]श्रीजयादित्यविरचितायां काशिकायां वृत्तौ [25]द्वितीयाध्यायस्य चतुर्थः पादः[26] ॥

----( ० )----

---

1. लुक् नास्ति ह. 2. अमादेशश्च इ. 3. तस्य भवति पञ्चमीं वर्जयित्वा क.ड.इ.ह. 4. तस्मिन् प्रतिषेधे ह. 5. श्रवणं भवत्येव फ. 6. उदाहरणमिदं नास्ति ड.इ.फ.ह.ग. 7. किमर्थम् इ.फ. 8. अधिशष्कुलि फ. 9. इदम् नास्ति क.इ. 10. विभक्त्योः नास्ति क.इ. 11. अम् फ, अमादेशो क.ड, अम्भावो विधीयते इ. 12. अव्ययीभावे नास्ति क.इ.फ. 13. समृद्धि° क.फ. 14. ऋद्धिसमास—इत्यधिकम् क. 15. नास्ति इ. 16. नदीसमास—इत्यधिकम् क. 17. नास्ति फ. 18. सङ्ख्या वंशे इत्यधिकम् क, सङ्ख्यावयवे इत्यधिकम् इ. 19. बहुलवचनेन इ. 20. यथासङ्ख्यम् अ.ह. 21. आत्मनेपदेषु ह, आत्मनेपदस्य च ड. 22. प्रथमपुरुषस्य इ. 23. श्वः नास्ति ब.क.इ.ह, कर्तासि ब. 24. विरचितायां नास्ति ड.ह. 25. द्वितीयस्य तुरीय पादः इ. 26. इति काशिकावृत्तौ द्वितीयाध्यायः समाप्तः । श्रीशके 1455 विजयाब्दे कार्तिके वदि 6 शुक्रे श्रीगोदातीरे श्रीनृसिंहक्षेत्रश्रीसिद्धेश्वरदेवसन्निधे उत्तरतीरे खावखेडग्रामे श्रीविश्वनाथपाठकस्यात्मजेन लिखितमिदम् । श्रीमदुपेन्द्रस्वाम्यर्थेन (स्वामिना?) लिखापितमिदम् । अन्नमठश्रीसोमलिङ्गार्पणमस्तु इत्यधिकम् इ.